# ॥ श्री राजराजेश्वर्यष्टकम् ॥

अम्बा शाम्भवि चन्द्र-मौलिरमलाऽपर्णा उमा पार्वती
काली हैमवती शिवा त्रिनयनि कात्यायनी भैरवी ।
सावित्री नवयौवना शुभकरी साम्राज्यलक्ष्मीप्रदा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ १ ॥

अम्बा मोहिनी देवता त्रिभुवनी आनन्दसन्दायिनि
वाणी पल्लवपाणि-वेणु-मुरली-गानप्रिया लोलिनी ।
कल्याणी उडुराजबिम्बवदना धूम्राक्षसंहारिणी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ २ ॥

अम्बा नूपुर-रत्नकङ्कणधरी केयूरहारावली
जाती-चम्पक-वैजयन्ति-लहरी ग्रैवेयकै राजिता ।
वीणा-वेणुविनोदमण्डितकरा विरासने संस्थिता
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥ ३ ॥

अम्बा रौद्रिणी भद्रकाली बगला ज्वालामुखी वैष्णवी
ब्रह्माणी त्रिपुरान्तकी सुरनुता देदीप्यमानोज्ज्वला ।
चामुण्डा श्रितरक्षपोषजननि दाक्षायणी वल्ल्वी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥४॥

अम्बा शूलधनुःकशाङ्कुशधरी अर्धेन्दु-बिम्बाधरी
वाराही मधुकैटभप्रशमनी वाणीरमासेविता ।
मल्लाद्यासुर-मूकदैत्य-मथनी माहेश्वरी चाम्बिका
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥५॥

अम्बा सृष्टि-विनाश-पालनकरी आर्या विसंशोभिता
गायत्री प्रणवाक्षरामृतरसः पूर्णानुसन्धीकृता ।
ओङ्कारी विनतासुतार्चित-पदा उद्दण्ड-दैत्यापहा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥६॥

अम्बा शाश्वत-आगमादि-विनुता आर्या महादेवता
या ब्रह्मादि-पिपीलिकान्त-जननी या वै जगन्मोहिनी ।
या पञ्चप्रणवादि-रेफजननी या चित्कलामालिनी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥७॥

अम्बा पालित-भक्तराजमनिशम् अम्बाष्टकं यः पठेत्
अम्बा लोल-कटाक्ष-वीक्ष-ललितं चैश्वर्यमव्याहतम् ।
अम्बा पावन-मन्त्रराज-पठनात् अन्ते च मोक्षप्रदा
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥८॥